(७.४.५३/२४८८) इति[1] लोपो न भवति। पूर्वविधौ इति [2]किम् ? हे गौः। बाभ्रवीयाः। नैधेयः। (म.भा. १. १४२) हे गौः इति वृद्धिरजादेशः[3] (७.१.९०/२८४) सम्बुद्धिलोपे कर्तव्ये न स्थानिवद् भवति। बाभ्रवीयाः इति बाभ्रव्यस्यामी[4] छात्राः इति[5] 'वृद्धाच्छः' (४.२.११४/१३३७) इति [6]छः। 'हलस्तद्धितस्य' (६.४.१५०/४७२) इति [7]यकारलोपे कर्तव्ये अवादेशो न स्थानिवद् भवति। नैधेयः-'आतो लोप इटि च' (६.४.६४/२३७२) इत्याकारलोपः, 'इतश्चानिञः' (४.१.१२२/११२५) इति द्व्यज्लक्षणे[8] प्रत्ययविधौ न स्थानिवद् भवति[9] ॥

## न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु। (५८/५१)

पूर्वेणातिप्रसक्तः [10]स्थानिवद्भाव एतेषु विधिषु प्रतिषिध्यते। [11]पदान्तविधिं प्रत्यजादेशो न स्थानिवद् भवति। [12]कौ स्तः। यौ स्तः। [13]तानि सन्ति। यानि सन्ति। श्नसोरल्लोपः क्ङिति सार्वधातुके[14] (६.४.१११/२४६९) इति परनिमित्तकः, [15]स पूर्वविधावावादेशे यणादेशे च कर्तव्ये स्थानिवत् स्यात्, अस्माद् वचनान्न[16] भवति।

द्विर्वचनविधिः--द्विर्वचनविधिं प्रति (अजादेशः) न स्थानिवद् भवति। दद्ध्यत्र। मद्ध्वत्र। यणादेशः परनिमित्तकः, तस्य [17]स्थानिवद्भावात् 'अनचि च' (८.४.४७/४८) इति [18]धकारस्य द्विर्वचनं न स्यादस्माद् वचनाद् भवति।

वरेविधिः--[19]वरे योऽजादेशः स पूर्वविधिं प्रति न स्थानिवद् भवति। अप्सु [20]यायावरः। [21]प्रवपेत पिण्डान्। यातेः यङन्तात् 'यश्च [22]यङः' (३.२.१७६/३१५६) इति वरचि कृते अतो लोपः (६.४.४८/२३०८) परनिमित्तकः, तस्य [23]स्थानिवत्त्वाद् 'आतो लोप इटि च' (६.४.६४/२३७२) इत्याकारलोपः स्याद्, अस्माद् वचनान्न भवति।

यलोपविधिः--यलोपविधिं [24]प्रत्यजादेशो न स्थानिवद् भवति। कण्डूतिः। [25]कण्डूयतेः क्तिनि कृते, अतो लोपः (६.४.४८/२३०८) परनिमित्तकः, 'लोपो व्योर्वलि' (६.१.६६/८७३) इति यलोपे स्थानिवत् स्यादस्माद् वचनान्न भवति।

स्वरविधिः--स्वरविधिं प्रति अजादेशो न स्थानिवद् भवति। चिकीर्षकः। जिहीर्षकः। [26]ण्वुलि कृते अतो लोपः (६.४.४८/२३०८) परनिमित्तकः, 'लिति'[27] (६.१.१९३/३६७६) प्रत्ययात् [28]पूर्वमुदात्तम्, इति [29]स्वरे कर्तव्ये न स्थानिवद् भवति इति[30]।

सवर्णविधिः--सवर्णविधिं प्रति अजादेशो[31] न स्थानिवद् [32]भवति। [33]शिण्ढि। पिण्ढि। शिषेः पिषेश्च लोण्मध्यमपुरुषैकवचने[34] 'रुधादिभ्यः श्नम्' (३.१.७८/२५४३)। [35]हित्वधित्वष्टुत्वजश्त्वेषु कृतेषु, श्नसो[36]रल्लोपः क्ङिति सार्वधातुके (६.४.१११/२४६९) परनिमित्तकः, [37]अनुस्वारस्य ययि परसवर्णे (८.४.५८/१२४) कर्तव्ये न स्थानिवद् भवति[38]।

---

1. इकारलोपः ग. 2. किम् नास्ति ग. 3. परनिमित्तकः इत्यधिकम् अ.ग.ड.फ. 4. इमे ग.फ.ह. 5. विगृह्य इत्यधिकम् ग.फ. 6. छः नास्ति अ.क.ड, छप्रत्ययो भवति ह. 7. इति यलोपे अ.क.ड.फ.ह. 8. द्व्यच्लक्षणप्रतिविधौ फ. ह. 9. भवति नास्ति फ. 10. स्थानिवत् ह, एषु विधिषु ग. फ., एतेषु प्रतिषिध्यते ह. 11. पदान्तविधौ न स्थानिवत् फ, तत्र भावात् ड. 12. कौ स्तः नास्ति फ. 13. तानि सन्ति नास्ति फ, कानि सन्ति ग. ह. 14. क्ङिति सार्वधातुके नास्ति ग. 15. स नास्ति ग. फ. ह. 16. प्रतिषिध्यते ग. 17. स्थानिवत्त्वात् क. ड. 18. धकारस्य नास्ति ग. 19. वरेऽचि परत्वे ग. 20. यायापर ग. 21. प्रवपते फ. 22. यङः नास्ति ह. 23. स्थानिवद्भावात् ग. 24. प्रत्यादेशः फ, अजादेशः नास्ति ह. 25. कण्डूतेः क्तिनि तु ग, क्तिचि अ. 26. ण्वुलि कृते नास्ति क. ड, ण्विलि ह. 27. लितीति क. 28. पूर्वमुदात्तः ग. ह. 29. उदात्तस्वरे ड. 30. ककारस्य स्वरः ह, ककारादीनां स्वरः ग, ईकारे स्वरः क. फ. 31. आदेशः नास्ति ड. फ. ह. 32. भवति नास्ति फ. 33. शिण्ड, पिण्ड ग. 34. कृते इत्यधिकम् ग. फ. 35. हित्व इति ग. 36. रलोपः ग. 37. अनुस्वारययि ग. 38. ततो झरो झरि इति ङकारस्य लोपः इत्यधिकम् ड.